# ॥ श्रीभवानीभुजङ्गप्रयातस्तोत्रम् ॥

षडाधारपङ्केरुहान्तर्विराजत्सुषुम्नान्तरालेऽतितेजोल्लसन्तीम् ।
सुधामण्डलं द्रावयन्तीं पिबन्तीं सुधामूर्तिमीडेऽहमानन्दरूपाम् ॥१॥

ज्वलत्कोटिबालार्कभासारुणाङ्गीं सुलावण्यशृङ्गारशोभाभिरामाम् ।
महापद्मकिञ्जल्कमध्ये विराजत्त्रिकोणोल्लसन्तीं भजे श्रीभवानीम् ॥२॥

क्वणत्किङ्किणीनूपुरोद्भासिरत्नप्रभालीढलाक्षार्द्रपादारविन्दाम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानां महादेवि मन्मूर्ध्नि ते भावयामि ॥३॥

सुशोणाम्बराबद्धनीवीविराजन्महारत्नकाञ्चीकलापं नितम्बम् ।
स्फुरद्दक्षिणावर्तनाभिं च तिस्रो वली रम्य ते रोमराजीं भजेऽहम् ॥४॥

लसद्वृत्तमुत्तुङ्गमाणिक्यकुम्भोपमश्रीस्तनद्वन्द्वमम्बाम्बुजाक्षीम् ।
भजे पूर्णदुग्धाभिरामं तवेदं महाहारदीप्तं सदा प्रस्नुतास्यम् ॥५॥

शिरीषप्रसूनोल्लसद्बाहुदण्डैर्ज्वलद्बाणकोदण्डपाशाङ्कुशैश्च ।
चलत्कङ्कणोदारकेयूरभूषोज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥६॥

शरत्पूर्णचन्द्रप्रभापूर्णबिम्बाधरस्मेरवक्त्रारविन्दं श्रियं ते ।
सुरत्नावलीहारताटङ्कशोभां भजे सुप्रसन्नामहं श्रीभवानीम् ॥७॥

सुनासापुटं पद्मपत्रायताक्षं यजन्तः श्रियं दानदक्षं कटाक्षम् ।
ललाटोल्लसद्गन्धकस्तूरिभूषोज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥८॥

चलत्कुन्तलान्तर्भ्रमद्भृङ्गवृन्दं घनस्निग्धधम्मिल्लभूषोज्ज्वलं ते।
स्फुरन्मौलिमाणिक्यबद्धेन्दुरेखा-विलासोल्लसद्दिव्यमूर्धानमीडे ॥९॥

स्फुरत्वम्ब बिम्बस्य मे हृत्सरोजे सदा वाङ्मयं सर्वतेजोमयं च ।
इति श्रीभवानीस्वरूपं तवेदं प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् ॥१०॥

गणेशाणिमाद्याखिलैः शक्तिवृन्दैः स्फुरच्छ्रीमहाचक्रराजोल्लसन्तीम् ।
परां राजराजेश्वरीं त्वां भवानीं शिवाङ्कोपरिस्थां शिवां भावयेऽहम् ॥११॥

त्वमर्कस्त्वमग्निस्त्वमिन्दुस्त्वमापस्त्वमाकाशभूवायवस्त्वं चिदात्मा ।
त्वदन्यो न कश्चित्प्रकाशोऽस्ति सर्वं सदानन्दसंवित्स्वरूपं तवेदम् ॥१२॥

गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव त्वमेवासि माता पिताऽसि त्वमेव।
त्वमेवासि विद्या त्वमेवासि बुद्धिर्गतिर्मे मतिर्देवि सर्वं त्वमेव ॥१३॥

श्रुतीनामगम्यं सुवेदागमाद्यैर्महिम्नो न जानाति पारं तवेदम् ।
स्तुतिं कर्तुमिच्छामि ते त्वं भवानि क्षमस्वेदमम्ब प्रमुग्धः किलाहम् ॥१४॥

शरण्ये वरेण्ये सुकारुण्यपूर्णे हिरण्योदराद्यैरगम्येऽतिपुण्ये ।
भवारण्यभीतं च मां पाहि भद्रे नमस्ते नमस्ते नमस्ते भवानि ॥१५॥

इमामन्वहं श्रीभवानीभुजङ्गस्तुतिं यः पठेच्छ्रोतुमिच्छेत् तस्मै ।
स्वकीयं पदं शाश्वतं चैव सारं श्रियं चाष्टसिद्धीश्च देवी ददाति ॥१६॥